लभ्यस्तेनैकेन जन्मना। पूर्व्वजन्मकृतं पापं तपोदानादिभिः शतैः। नश्येत्, सद्यो विनश्येत्तु कृत्तिवासेश्वरेक्षणात्। कृत्तिवासेश्वरं लिङ्गं येऽर्च्चयिष्यन्ति मानवाः। प्रविष्टास्ते शरीरे मे तेषां नास्ति पुनर्भवः। अविमुक्ते निवस्तव्यं जप्तव्यं शतरुद्रियम्। कृत्तिवासेश्वरोदेवो द्रष्टव्यश्च पुनः पुनः। सप्तकोटिमहारुद्रैः सुजप्तैर्यत् फलं लभेत्। तत् फलं लभ्यते काश्यां पूजनात् कृत्तिवाससः। माघकृष्णचतुर्द्दश्यामुपोष्य निशि जागरात्। कृत्तिवासेशमभ्यर्च्चेद्यः स यायात् परां गतिम्। शुक्लायां पञ्चदश्यां यश्चैत्र्यां कर्त्ता महोत्सवम्। कृत्तिवासेश्वरे लिङ्गे न स गर्भे प्रवेक्ष्यति। कथयित्वा तु देवेशस्तत्कृत्तिं परिगृह्य च। गजासुरस्य महतीं प्राहगोत्तां दिगम्बरः। यत्र शूलीकृतो दैत्यः शूलमारोप्य भूतले। तच्छूलपाटनाज्जातं तत्र कुण्डं महत्तरम्। तस्मिन् कुण्डे नरः स्नात्वा कृत्वा च पितृतर्पणम्। कृत्तिवासेश्वरं दृष्ट्वा कृतकृत्यतरोभवेत्”॥

कृत्नु त्रि॰ कृ—क्नु। कारौ शिल्पिनि उणा॰ “बहुकर्म्मकरे च। “कृणवा कृत्नो! अकृतम्” ऋ॰ ६।१८।१५। “कृत्नो! बहुलकर्म्मणां कर्त्तः” भा॰

कृत्य न॰ कृ—क्यप् तुक् च। १कार्य्ये, व्याकरणप्रसिद्धे पाणिन्यादिपरिभाषिते २तव्यादौ ण्यत्क्यप्तव्यानीयर्यत्केलिमाख्ये प्रत्यये। ३कर्त्तव्ये त्रि॰ हेमच॰ “कृतकृत्यो विधिर्मन्ये” माघः। ४विद्विष्टे त्रि॰। मेदि॰५धनादिभेद्ये त्रि॰ जटा॰ “कृत्याः” पा॰ “तयोरेव कृत्यक्तखलर्थाः” “कृत्यैरधिकार्थवचने” पा॰। “कृत्याः षट् ते समाख्याताः क्यप्ण्यतौ भावकर्म्मणोः। तव्यानीयावलन्तात् यत् केलिमः कर्म्मकर्त्तरि” सुपद्म॰। कृत्याः इत्यधिकारे तेषां विहितत्वात् तेषां तत्संज्ञत्वम्। कृत्यप्रत्ययस्तु धातुविशेषात् कर्म्मभावादौ विहितः। कृत्यञ्च वेदादिविहितावश्यकर्त्तव्याचारविशेषः। तदधिकारेणैव कृत्यचिन्तामणिकृत्यतत्त्वकृत्यरत्नाकरादयोग्रन्थविशेषाः प्रवृत्ताः

कृत्यविद् त्रि॰ कृत्यं कर्त्तव्यं वेत्ति विद—क्विप्। कार्य्यज्ञे विविज्ञे, “कृत्यविदित्युवाचेति” रघुः।

कृत्या स्त्री॰ कृ—क्यप् टाप्। १क्रियायां २अभिचारक्रियाजन्ये अभिचारोद्देश्यनाशके ३देवादिमूर्त्तिभेदे च सा च वैदिकाद्यभिचारक्रियाजन्या अदृष्टविशेषनिर्वर्त्त्या देवादिमूर्त्तिरूपतयोत्पद्य अभिचारोद्देश्यं पुरुषं निहत्य नश्यतीति अथर्ववेदे प्रसिद्धम्। “पञ्चकल्पमथर्वाणं कृत्याभिः परिबृंहितम्” भा॰शा॰३४४अ॰। कृत्याविशेषोत्पादनकथा भा॰ आनु॰ ९०अ॰ यथा

“इत्युक्तः स तु भृत्यैस्तैर्वृषादर्भिस्तु कोप ह। तेषां वै प्रतिकर्त्तुञ्च सर्व्वेषामगमद्गृहम्। स गत्वा हवनीयेऽग्नौ तीव्रं नियममास्थितः। जुहाव संस्कृतैर्मन्त्रैरेकैकामाहुतिं नृपः। तस्मादग्नेः समुत्तस्थौ कृत्या लोकभयङ्करी। तस्या नाम वृषादर्भिर्यातुधानीत्यथाकरोत्। सा कृत्या कालरात्रीव कृताञ्जलिरुपस्थिता। वृषादर्भिं नरपतिं किङ्करोमीति साऽब्रवीत्। वृषादर्भिरुवाच। ऋषीणां गच्छ सप्तानामरुन्धत्यास्तथैव च। दासीभर्त्तुश्च दास्याश्च मनसा नाम धारय। ज्ञात्वा नामानि चैवैषां सर्व्वानेतान् विनाशय। विनष्टेषु तथा स्वैरं गच्छ यत्रेप्सितं तव। सा तथेति प्रतिश्रुत्य यातुधानीस्वरूपिणी। जगाम तद्वनं यत्र विचेरुस्ते महर्षयः”। “इन्द्रेण च सा नाशितेति तत्रैवान्ते उक्तम् यथा

“रक्षणार्थञ्च सर्वेषां भवतामहमागतः। यातुधानी ह्यतिक्रूरा कृत्यैषा वो बधैषिणी। वृषादर्भिप्रयुक्तैषा निहता मे तपोधनाः!। दुष्टा हिंसादियं पापा युष्मान् प्रत्यग्निसम्भवा”।

कृत्यानिवारणोपायमन्त्राश्च अथ॰ ५,१२,१४, उक्ता यथा “सुपर्णस्त्वान्वविन्दत्सूकरस्त्वाखनन्नसा। दिप्सौषधे! त्वं दिप्सन्तमव कृत्याकृतं जहि। अव जहि यातुधानानव कृत्याकृतं जहि। अथो यो अस्मान्दिप्सति तमु त्वं जह्योषधे!। रिश्यस्येव परीशासं परिकृत्य परि त्वचः। कृत्यां कृत्याकृते देवा निष्कमिव प्रति मुञ्चत। पुनः कृत्यां कृत्याकृते हस्तगृह्य परा णय। समक्षमस्मा आ धेहि यथा कृत्याकृतं हनत्। कृत्याः सन्तु कृत्याकृते शपथः शपथीयते। सुखो रथ इव वर्त्ततां कृत्या कृत्याकृतं पुनः। यदि स्त्री यदि वा पुमान् कृत्यां चकार पाप्मने। तामु तस्मै नयामस्यश्वमिवाश्वाभिधान्या। यदि वासि देवकृता यदि वा पुरुषैः कृता। तां त्वा पुनर्णयामसीन्द्रेण सयुजा वयम्। अग्ने पृतनाषाट् पृतनाः सहस्व। पुनः कृत्यां कृत्याकृते प्रतिहरणेन हरामसि। कृतव्यधनि! विध्य तं यश्चकार तमिज्जहि। न त्वामचक्रुषे वयं बधाय सं शिशीमहि। पुत्र इव पितरं गच्छ स्वज इवाभिष्ठितो दश। बन्धमिवावक्रामी गच्छ कृत्ये! कृत्याकृतं पुनः। उदेणीव वारण्यभिस्कन्दं मृगीव। कृत्या कर्त्तारमृच्छतु। इष्वा ऋजीयः पततु द्यावापृथिवी तं प्रति। सा तं मृग-